# सत्यवादी बालकः

**(त्वा-ल्यप्-तुमुन्-प्रयोगः)**



कटकनगरे किञ्चन गृहम् । एकदा गृहस्वामिनी पुत्रस्य प्रकोष्ठं गतवती । पुत्रस्य पुस्तकानां निधानिकातः पिपीलिकाः पङ्क्तिशः आगच्छन्ति स्म । ताः **दृष्ट्वा** सा चकिता अभवत् । पुत्रस्य प्रकोष्ठः सर्वदा स्वच्छः तिष्ठति । तत्र कथं पिपीलिकाः आगच्छन् ? प्रायः निधानिकायां कोऽपि कीटः मृतः स्यात् । तं कीटं **द्रष्टुं** सा यत्नं कृतवती । अकस्मात् सा पुस्तकानां मध्ये रोटिकां दृष्टवती । ततः एव पिपीलिकानां पङ्क्तिः आगच्छति । ताः पिपीलिकाः रोटिकाः **त्रोटयित्वा** नयन्ति ।

पुत्रस्य कार्यसम्पादने किञ्चन उद्देश्यं भवति इति सा जानाति । किन्तु एवं रोटिकानां गोपनकरणे किम् उद्देश्यं स्यात् इति **चिन्तयितुं** सा असमर्था भवति । तस्मिन् समये पुत्रः आगत्य स्वप्रकोष्ठं प्रविष्टवान् । निधानिकायाः समीपे मातरं दृष्टवान् । तं **दृष्ट्वा** कोपेन माता- ''किं तव मतिः भ्रष्टा भवति ? किमर्थं त्वं रोटिकाः आनीय निधानिकायां स्थापितवान् ?'' इति तर्जितवती ।

म्लानमुखः पुत्रः- ''मातः ! इदानीं निधानिकातः ताः रोटिकाः निष्कासयितुं भवती समर्था अस्ति । इतः परं तासाम् आवश्यकता कापि नास्ति ।'' इति **उक्त्वा रोदितुम्** आरब्धवान् ।

पुत्रस्य नयनयोः अश्रूणि **दृष्ट्वा** तस्याः कोपः दूरं गतः । सा प्रीत्या- ''वत्स ! किम् अभवत् ? किमर्थं रोदनं करोषि ?'' इति अपृच्छत् ।

मातुः वचनं **श्रुत्वा** पुत्रः वदति- मातः ! अहं प्रतिदिनं भोजनात् रोटिकाः **सञ्चित्य** विद्यालयं नयामि । विद्यालयमार्गे उपविष्टायै वृद्धायै ददामि स्म । किन्तु ह्यः अहं रोटिकाः दातुं यदा अगच्छम्, तदा सा तत्र न आसीत् । श्वः दास्यामि इति **चिन्तयित्वा** गृहम् आगतवान् । ताः रोटिकाः **आनीय** निधानिकायां स्थापितवान् । अद्य श्रुतवान् सा मृता इति **कथयित्वा** पुनः उच्चैः **क्रन्दितुम्** आरब्धवान् ।

एतत् वचनं **श्रुत्वा** माता अतीव सन्तुष्टा अभवत् । पुत्रस्य एतादृशं स्वभावं विचिन्त्य अतीव आनन्दम् अनुभूतवती ।

सः बालकः अग्रे **गत्वा** महान् देशभक्तः अभवत् । सः एव क्रान्तिकारी सुभाषचन्द्रबोषः ।

| **गृहस्वामिनी, निधानिका, पिपीलिकाः, चकिता, रोटिका, क्रान्तिकारी** |
|---|

# टिप्पणी

**शब्दार्थः -**

गृहस्वामिनी - गृहमुख्या (ଘର ମାଲିକାଣୀ), पिपीलिकाः - 'पिम्पूडि' इति भाषायाम् (ପିମ୍ପୁଡ଼ିମାନେ), दृष्ट्वा - दर्शनं कृत्वा (ଦେଖି), कीटः - कृमिः (କୃମି, କୀଟ), निधानिकातः - पुस्तकस्थापनस्थानतः (ବହିଥାକରୁ), पङ्क्तिशः - क्रमशः (ଧାଡ଼ିରେ), स्वच्छः - निर्मलः (ସଫା), द्रष्टुम् - दर्शनं कर्त्तुम् (ଦେଖିବାକୁ), त्रोटयित्वा - छेदनं कृत्वा - (ଛିଣ୍ଡାଇ), आगत्य - आगमनं कृत्वा - (ଆସି), तर्जितवती - निन्दितवती - (ଗାଳିଦେଲେ), म्लानमुखः - उदासमुखः - (ଉଦାସ ମୁହଁ), निष्कासयितुम् - निष्कासनं कर्तुम् - (ବାହାର କରିବାକୁ), उक्त्वा - कथयित्वा - (କହି), रोदितुम् - क्रन्दनं कर्तुम् - (କାନ୍ଦିବା ପାଇଁ), श्रुत्वा - श्रवणं कृत्वा - (ଶୁଣି), प्रीत्या - स्नेहेन - (ସ୍ନେହରେ), सञ्चित्य - सञ्चयं कृत्वा - (ସଞ୍ଚୟ କରି), उपविष्टायै वृद्धायै - उपविष्टायाः वृद्धायाः कृते - (ବସିଥିବା ବୁଢ଼ୀ ପାଇଁ), ह्यः - गतदिवसे - (ଗତଦିନ), श्वः - आगामिदिवसे - (ଆସନ୍ତାକାଲି), चिन्तयित्वा - चिन्तनं कृत्वा - (ଚିନ୍ତାକରି), उच्चैः– उच्चस्वरेण - (ଜୋର୍‌ରେ), क्रन्दितुम् - क्रन्दनं कर्तुम् - (କାନ୍ଦିବା ପାଇଁ) ।

## अभ्यास :

**पश्यत, उच्चैः पठत :-**

<u>तुमुन् प्रत्ययः</u>

| | |
|---|---|
| लिख् = लिखति - लेखितुम् | खाद् = खादति - खादितुम् |
| क्रीड् = क्रीडति - क्रीडितुम् | चल् = चलति - चलितुम् |
| धाव् = धावति - धावितुम् | ज्ञा = जानाति - ज्ञातुम् |
| हस् = हसति - हसितुम् | दा = ददाति - दातुम् |
| स्था = तिष्ठति - स्थातुम् | दृश् = पश्यति - द्रष्टुम् |
| गम् = गच्छति - गन्तुम् | श्रु = शृणोति - श्रोतुम् |
| गै = गायति - गातुम् | नी = नयति - नेतुम् |
| वद् = वदति - वक्तुम् | युद्ध = युद्ध्यति - योद्धुम् |
| प्र - विश् =प्रविशति - प्रवेष्टुम् | आ-नी = आनयति - आनेतुम् |
| वि - स्मृ = विस्मरति - विस्मर्तुम् | उत्-स्था = उत्तिष्ठति - उत्थातुम् |

उत् - नी = उन्नयति - उन्नेतुम्

आ - कर्ष = आकर्षति - आकर्ष्टुम्

भक्ष् = भक्षयति - भक्षयितुम्

नृत् = नृत्यति - नर्तितुम्

अनु-कृ = अनुकरोति - अनुकर्त्तुम्

चिन्त् = चिन्तयति - चिन्तयितुम्

दह् = दहति - दग्धुम्

दण्ड् = दण्डयति - दण्डयितुम्

पच् = पचति - पक्तुम्

- **वाक्यद्वयम् एकवाक्यं भवति -**
- धावक: धावति, क्रीडाङ्गनं गच्छति - धावक: धावितुं क्रीडाङ्गनं गच्छति ।
- छात्र: अपठत्, पुस्तकम् अनयत् - छात्र: पठितुं पुस्तकम् अनयत् ।
- भक्ता: अर्चयिष्यन्ति, मन्दिरं गमिष्यन्ति - भक्ता: अर्चयितुं मन्दिरं गमिष्यन्ति ।

**क्त्वा प्रत्यय:, ल्यप् प्रत्ययश्च**

गम् - गच्छति = गत्वा, - आगच्छति = आगत्य

नी-नयति = नीत्वा - आनयति = आनीय

ग्रह्-गृह्णाति = गृहीत्वा - संगृह्णाति = संगृह्य

स्मृ-स्मरति = स्मृत्वा - विस्मरति = विस्मृत्य

त्यज्-त्यजति = त्यक्त्वा - परित्यजति = परित्यज्य

गम् - गच्छति = गत्वा, - अवगच्छति = अवगत्य

कृ-करोति = कृत्वा - उपकरोति = उपकृत्य

लिख्-लिखति = लिखित्वा - विलिखति = विलिख्य

क्री-क्रीणाति = क्रीत्वा - विक्रीणाति = विक्रीय

हृ-हरति = हृत्वा - संहरति = संहृत्य

कृ-करोति = कृत्वा - निराकरोति = निराकृत्य

स्था-तिष्ठति = स्थित्वा - उत्तिष्ठति = उत्थाय

१. **उदाहरणं दृष्ट्वा रूपाणि लिखत । <u>ल्यप्</u>**

| | | | |
|---|---|---|---|
| *प्र + क्षालयति =* | *प्रक्षाल्य* | *प्र + आप्नोति =* | *प्राप्य* |
| आ + गच्छति = | .............. | उद् + धरति = | .............. |
| प्र + नमति = | .............. | उप + करोति = | .............. |
| परि + गणयति = | परिगणय्य | वि + गणयति = | .............. |
| अभि + नन्दति = | .............. | निर् + गच्छति = | .............. |
| वि + चारयति = | विचार्य | परि + वेषयति = | .............. |
| परि + त्यजति = | .............. | प्र + दर्शयति = | .............. |

२. **क्त्वा -**

| | | | | | |
|---|---|---|---|---|---|
| *गच्छति* | *=* | *गत्वा* | *नमति* | *=* | *नत्वा* |
| पश्यति | = | .............. | त्यजति | = | .............. |
| रचयति | = | .............. | कथयति | = | .............. |
| ददाति | = | दत्त्वा | वर्णयति | = | .............. |
| स्मरति | = | .............. | भक्षयति | = | .............. |
| धावति | = | .............. | नयति | = | .............. |
| चलति | = | .............. | खादति | = | .............. |

३. **तुमुन् -**

| | | | | | |
|---|---|---|---|---|---|
| पश्यति | = | द्रष्टुम् | नयति | = | .............. |
| तिष्ठति | = | .............. | चलति | = | चलितुम् |
| उन्नयति | = | .............. | दहति | = | .............. |
| धावति | = | .............. | उत्तिष्ठति | = | उत्थातुम् |

| | | | | | |
|---|---|---|---|---|---|
| ददाति | = | .............. | युद्ध्यति | = | .............. |
| जानाति | = | .............. | पचति | = | .............. |
| आनयति | = | .............. | ताडयति | = | .............. |
| विस्मरति | = | .............. | गायति | = | .............. |

**४. तुमुन्-रूपस्य प्रयोगेण वाक्यद्वयम् एकं वाक्यं कुरुत ।**

*यथा - शिशुः चलितवान्, प्रयत्नं कृतवान्* = *शिशुः चलितुं प्रयत्नं कृतवान् ।*

(क) माता जलम् अपिबत्, पाकशालाम् अगच्छत् = ..................................

(ख) वक्ता अवदत्, सभाम् अगच्छत् = ..................................

(ग) सः वैज्ञानिकः भविष्यति, सम्यक् पठिष्यति = ..................................

(घ) मित्राणि चाकलेहं खादन्ति, आपणं गच्छन्ति = ..................................

(ङ) वयम् अर्चयामः, मन्दिरं गच्छामः = ..................................

**५. उदाहरणं पश्यत, वाक्यानि रचयत ।**

| | | | | |
|---|---|---|---|---|
| *उदा -* | *सः* | ***(भ्रमणं)*** *गच्छति* | = | *सः* ***भ्रमितुं*** *गच्छति* |
| (ख) | बालाः | **(खेलनम्)** इच्छन्ति | = | .................................. |
| (ग) | भवन्तः | **(गमनं)** शक्नुवन्ति | = | .................................. |
| (घ) | अहं | **(स्मरणं)** चिन्तयामि | = | .................................. |
| (ङ) | प्रतिनिधयः | **(चर्चार्थं)** अगच्छन् | = | .................................. |
| (च) | भवती गीतं | **(श्रवणार्थं)** इच्छति वा ? | = | .................................. |
| (छ) | कर्कटीं | **(चर्बणार्थं)** दन्ताः न सन्ति | = | .................................. |

६. **कोष्ठके पदानि पश्यत, उदाहरणानुसारं वाक्यानि रचयत ।**

| | | | |
|---|---|---|---|
| | खादामि | गृहं | |
| | भ्रमामि | काश्मीरं | |
| | अर्चयामि | मन्दिरं | |
| | पठामि | छात्रावासं | |
| अहं | पत्रं प्रेषयामि | पत्रालयं | गच्छामि |
| | मिलामि | राज्यपालभवनं | |
| | स्नातकः भवामि | महाविद्यालयं | |
| | रसं पास्यामि | आपणं | |
| | क्रेष्यामि | विपणीं | |
| | लेखिष्यामि | प्रकोष्ठम् | |

उदा - अहं खादितुं गृहं गच्छामि ।

(क) ........................................

(ख) ........................................

(ग) ........................................

(घ) ........................................

(ङ) ........................................

(च) ........................................

(छ) ........................................

(ज) ........................................

(झ) ........................................

७. **एकपदेन उत्तरं कुरुत ।**

(क) गृहस्वामिनी कुत्र गतवती ?

(ख) का पुत्रस्य प्रकोष्ठं गतवती ?

(ग) माता पुस्तकानां मध्ये कां दृष्टवती ?

(घ) पिपीलिकाः किं नयन्ति ?

(ङ) पुत्रः कुत्र मातरं दृष्टवान् ?

(च) कुतः रोटिकाः निष्कासयितुं भवती समर्था इति पुत्रः उक्तवान् ?

(छ) पुत्रस्य किं दृष्ट्वा मातुः कोपः अपगतः ?

(ज) पुत्रः रोटिकाम् आनीय कुत्र स्थापितवान् ?

(झ) पुत्रस्य स्वभावं विचिन्त्य माता किम् अनुभूतवती ?

(ञ) सः देशभक्तः बालकः कः ?

८. **संक्षेपेण उत्तरं कुरुत ।**

(क) निधानिकातः काः पंक्तिशः आगच्छन्ति स्म ?

(ख) पुत्रस्य प्रकोष्ठः सदा कीदृशः तिष्ठति ?

(ग) अकस्मात् पुस्तकानां मध्ये सा किं दृष्टवती ?

(घ) पुत्रस्य प्रत्येकस्मिन् कार्ये किं भवति ?

(ङ) पुत्रः कुत्र मातरं दृष्टवान् ?

(च) पुत्रः कथं क्रन्दितवान् ?

(छ) पुत्रस्य नयनयोः कानि दृष्ट्वा मातुः कोपः अपागच्छत् ?

(ज) पुत्रः विद्यालयमार्गे कस्यै रोटिकाः ददाति स्म ?

(झ) पुत्रः वृद्धाविषये किं श्रुतवान् ?

(ञ) पुत्रस्य वचनं श्रुत्वा माता कीदृशी अभवत् ?

९. **रिक्तस्थानं पूरयत ।**

(क) ताः .................. सा चकिता अभवत् ।

(ख) रोटिकातः .................. नयन्ति ।

(ग) गोपने किम् उद्देश्यं स्यात् इति .................. सा असमर्था ।

(घ) तस्मिन् समये पुत्रः .................. स्वप्रकोष्ठं प्रविष्टवान् ।

(ङ) किमर्थं भवान् रोटिकाम् .................. निधानिकायां स्थापितवान् ।

(च) ताः रोटिकाः .................. भवती समर्था अस्ति ।

(छ) प्रतिदिनं रोटिकाः .................. विद्यालयं नयामि ।

(ज) अहं रोटिकाः .................. गमनसमये सा तत्र न आसीत् ।

(झ) पुनः उच्चैः .................. आरब्धवान् ।

(ञ) एतादृशं स्वभावं .................. सा अतीव आनन्दम् अनुभूतवती ।

(त्रोटयित्वा, चिन्तयितुम्, दृष्ट्वा, आगत्य, निष्कासयितुम्, आनीय, सञ्चित्य, दातुम्, क्रन्दितुम्, विचिन्त्य)

**१०. मातृभाषया अर्थं लिखत ।**

(क) यतः पुत्रस्य प्रकोष्ठः सर्वदा स्वच्छः तिष्ठति ।

..................................................

(ख) प्रायः निधानिकायां कोऽपि कीटः मृतः स्यात् ।

..................................................

(ग) ताः पिपीलिकाः रोटिकाः **त्रोटयित्वा** नयन्ति ।

..................................................

(घ) तस्मिन् समये पुत्रः आगत्य स्वप्रकोष्ठं प्रविष्टवान् ।

..................................................

(ङ) अहं रोटिकाः दातुं गमनसमये सा तत्र न आसीत् ।

..................................................

(च) श्वः दास्यामि इति चिन्तयित्वा गृहम् आगतवान् ।

..................................................

(छ) सः बालकः अग्रे गत्वा महान् देशभक्तः अभवत् ।

..................................................

**११. उचितपदेन शून्यस्थानं पूरयत ।**

(क) तं कीटं __________ सा यत्नं कृतवती । (दर्शितुं, दर्शयितुं, द्रष्टुं)

(ख) पिपीलिकाः रोटिकाः __________ नयन्ति । (त्रुट्वा, त्रुटित्वा, त्रोटयित्वा)

(ग) सः बालकः अग्रे __________ देशभक्तः अभवत् । (गमित्वा, गत्वा, गच्छित्वा)

(घ) श्वः दास्यामि इति __________ गृहम् आगतवान् । (चिन्तयित्वा, चित्रित्वा, चित्वा)

(ङ) अहं रोटिकाः __________ विद्यालयं नयामि । (सञ्चित्वा, सञ्चित्य, सञ्चायित्वा)

●